International Journal of Sanskrit Research 2020; 6(2): 39-41

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(2): 39-41
© 2020 IJSR
www.anantaajournal.com
Received: 24-01-2020
Accepted: 28-02-2020

**डॉ. दिनकर मराठे**
सहायक प्राध्यापक,
कविकुलगुरुकालिदाससंस्कृतविद्या
पीठम्, रामटेकम्, नागपुरम्,
महाराष्ट्र, भारत

Corresponding Author:
**डॉ. दिनकर मराठे**
सहायक प्राध्यापक,
कविकुलगुरुकालिदाससंस्कृतविद्या
पीठम्, रामटेकम्, नागपुरम्,
महाराष्ट्र, भारत

# भारते अतिवृष्टेः परिणामानां ज्योतिषशास्त्रद्वारा नियन्त्रणम् - एका समीक्षा

**डॉ. दिनकर मराठे**

## प्रस्तावना

यथा शिखा मयूराणां नागानां मणयो यथा ।
तद्वद्वेदाङ्गशास्त्राणां ज्योतिषं मूर्ध्नि संस्थितम् ॥
वे.ज्यो.१/४

ज्योतींषि ग्रहनक्षत्राणि अधिकृत्य प्रवर्तितं यच्छास्त्रं तन्नाम **ज्योतिष**मिति कथ्यते। इदं तु प्रत्यक्षं शास्त्रम् अस्ति। यतोहि अन्येषु शास्त्रेषु यथा विवादा: सन्ति तथा अत्र न सन्ति। सूर्यचन्द्रबुधशुक्रादिग्रहाणां गतिस्थित्यादीनां वर्णनम् अत्र भवति। एतेषां ग्रहाणां प्रत्यक्षदर्शनम् अस्माभि: क्रियते अत: शास्त्रमिदं प्रत्यक्षम् अस्ति इति सिध्यति। अत: उक्तम्-

अप्रत्यक्षाणि शास्त्राणि विवादस्तेषु केवलम्।
प्रत्यक्षं ज्योतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ॥
सा.(भूमिका)पृ.क्र.६

ज्योतिषस्य त्रय: स्कन्धा: सन्ति -- १ सिद्धान्तः २ संहिता ३ होरा च । अत: उच्यते –

सिद्धान्तसंहिताहोरारूपस्कन्धत्रयात्मकम्।
वेदस्य निर्मलं चक्षुर्ज्योतिश्शास्त्रमकल्मषम्॥
ना.सं.१/४

ज्योतिश्शास्त्रं वेदानां चक्षु: इति कथ्यते।

इदं कालविज्ञापकं शास्त्रम् । मुहूर्त्तं शोधयित्वा क्रियमाणा यज्ञादिक्रियाविशेषाः फलाय कल्पन्ते, नान्यथा, तन्मुहूर्त्तज्ञानञ्च ज्यौतिषायत्तमतोऽस्य ज्यौतिषशास्त्रस्य वेदाङ्गत्वं स्वीकृतम् । उक्तश्चायमर्थ आर्चज्योतिषे, यथा –

वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्वा विहिताश्च यज्ञाः ।
तस्मादिदं कालविधानशास्त्रं यो ज्यौतिषं वेद स वेद यज्ञान् ॥

वे.ज्यो.१/३

एवं कालनिर्णयार्थं प्रवृत्तस्य शास्त्रस्य वातावरणनिर्णये किमौचित्यम् इत्यत्र विचार्यते।

अस्माकं भारतदेशः कृषिप्रधानदेशः। कृषिकार्याय वयमधुनापि वृष्टिमेवाश्रयामः। वृष्टिकालाधारेणैव अस्माकं सस्यर्तुनिर्णयः जायते। अस्माकं त्रयः सस्यर्तवः सन्ति । रबी, खरीफ, जायद च।

### रबी

शीतर्तौ अक्टूबर-मासतः दिसम्बर-मासाभ्यान्तरं रबी-सस्यानां रोपणं क्रियते । ततः परं ग्रीष्मर्तौ अप्रैल-मासतः जून-मासाभ्यान्तरं रबी-सस्यानां कर्तनं क्रियते । शीतर्तौ पश्चिमीवर्षा रबी-सस्यानाम् उत्पादने साहाय्यं करोति।

### खरीफ

ग्रीष्मर्तोः परं वर्षर्तोः आगमने खरीफ-सस्यानां रोपणं क्रियते । ततः परं सितम्बर-मासतः अक्टूबर-मासाभ्यान्तरं खरीफ-सस्यानां कर्तनं क्रियते ।

### जायद

रबी-खरीफ इत्येतयोः सस्ययोः मध्ये ग्रीष्मर्तौ जायद-सस्यानां रोपणं क्रियते । अस्मिन् सस्ये कालिङ्गं, वृत्तकर्कटी, शाकः, तृणसस्यं च उत्पाद्यते।

एतेषां सम्यदुत्पादनाय वृष्टिविषये ज्ञानमत्यन्तमावश्यकं वर्तते। तथैव अतिवृष्ट्यनावृष्ट्यादीनां प्राकृतिकसमस्याः अपि राष्ट्रस्याहितकारिण्यः वर्तन्ते।

### अतिवृष्टिः

वर्षर्तौ नदीनां जलस्य स्तरः वर्धते। स्तरसीमायाः परं जलं बहिरागच्छति। तेन कारणेन नदीनां जलं मानवीयप्रदेशं प्रविशति। निरन्तरं वर्षायाः कारणेन जलस्य स्तरः बहु वर्धते। तेन कारणेन अतिवृष्ट्याः स्थितिः निर्मीयते। यदा नदीषु जलवाहिकासु क्षमतायाः अधिकः जलप्रवाहः भवति, तदा अतिवृष्टिः कथ्यते। अतिवृष्ट्याः अन्यानि बहूनि कारणानि अपि सन्ति। यथा –

1. तटीयक्षेत्रेषु झञ्झावातः।
2. दीर्घकालं यावत् वर्षा भवेत्।
3. हिमद्रवः भवेत्।
4. भूमेः अन्तःस्पन्दनमाने अल्पता।

अतिवृष्टिः विशेषतः विस्तृतक्षेत्रेषु आगच्छति। तदा विनाशः अपि अधिकः भवति। अस्याः आपदः मानवः स्वयम् एव कारणम् अस्ति। वनच्छेदनेन, अवैज्ञानिककृषिपद्धत्या च अतिवृष्टौ तीव्रता आगच्छति।

### अतिवृष्टेः परिणामाः नियन्त्रणं च

तेन कारणेन भारतस्य अर्थव्यवस्था शिथिला जाता। अतिवृष्ट्या केवलं सस्यानि न नश्यन्ति, अपि तु मानवीयसंरचनायाः अपि नाशं भवति। यथा – परिवहनतन्त्रम्, जनानाम् आवासः इति। अतिवृष्ट्या ग्रसितक्षेत्रेषु बहवः रोगाः उत्पद्यन्ते।

### अनावृष्टिः

दीर्घकालं यावत् वर्षायाः अभावेन, अधिकबाष्पीकरणेन, जलाशयानां भूमिगतजलस्य अत्यधिकप्रयोगेण च पृथिव्यां जलस्य अभावः भवेत्। सा अनावृष्टिः कथ्यते।

इयम् आपद् एका जटिला परिघटना वर्तते। अस्याः परिघटनायाः बहवः प्रकाराः सन्ति। यथा – वृष्टिः, बाष्पीकरणं, बाष्पोत्सर्जनं, कृषिपद्धतिः इत्यादयः।

अनावृष्ट्याः समाजे प्रभावः भवति। सस्यानां नाशात् अन्नस्य अल्पता भवति। अनावृष्ट्या पशूनां, पशुपालकानां मृत्युः भवति। सामाजिकं, प्राकृतिकं च पर्यावरणम् अनावृष्ट्या प्रभावितं भवति। अस्य प्रभावः दीर्घकालिकः भवति ।

वैज्ञानिकानाम् अनुमानेन भारतदेशे भौगोलिकक्षेत्रस्य १९% भागः, जनसङ्ख्यायाः ३०% भागः च अनावृष्ट्या प्रभावितः भवितुं शक्नोति । अतः भारतस्य ५ कोटिः जनाः अनावृष्ट्या प्रभाविताः सन्ति। प्रायः एतावत् अपि दृष्टम् अस्ति यत्, केषुचित् भागेषु अतिवृष्टिः भवति, अन्यत्र केचित् भागाः अनावृष्ट्या प्रभाविताः भवन्ति।

ज्योतिश्शास्त्रस्य वृष्टिविज्ञानम् –

मार्गशिरः सितपक्षप्रतिपत्प्रभृति क्षपाकरेऽषाढाम् ।
पूर्वां वा समुपगते गर्भाणां लक्षणं ज्ञेयम् ॥
बृ.सं.अ.२१श्लो.६

मार्गशीर्ष मासस्य सितपक्षप्रतिपत्प्रभृति शुक्लपक्षप्रतिपदारभ्य क्षपाकरे चन्द्रे अषाढां पूर्वां वा स्मुपगते पूर्वाषाढां प्राप्ते । वाशब्दोऽत्र चार्थे । मार्गशीर्षशुक्लपक्षे यदा पूर्वाषाढास्थश्चन्द्रमा भवति तदारभ्य गर्भाणां लक्षणं ज्ञेयं ज्ञातव्यमिति ।

ईदृशसमस्यानां प्राग्ज्ञानेन तासां निवारणोपायान् ज्ञात्वा तदनुगुणं परिहारविधानाय शास्त्रमिदमुपकारकं भवति। तथैव वृष्ट्यादिविषये पूर्वज्ञानेन कृषिकार्येष्वपि शास्त्रमिदमुपकारकं भवति।

एवं मानवजीवनस्य समस्तक्षेत्रेषु शास्त्रस्यास्य चाक्षुषत्वं वर्तते इति तु निश्चप्रचम्।

**सन्दर्भा**

1. वेदाङ्ग ज्योतिष, सुरेशचन्द्र मिश्रा, रंजन प्रकाशन, २००५
2. सारावली, कल्याणवर्मा, चौखंबा कृष्णदास अकॅडमी, वारानसी, २००५
3. नारद संहिता, खेमराज, श्रीकृष्णदास प्रकाशन, २०१०
4. वेदाङ्ग ज्योतिष, सुरेशचन्द्र मिश्रा, रंजन प्रकाशन, २००५
5. बृहत्संहिता, आ. वराह मिहिर, रंजन प्रकाशन,१९९७